श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचिता

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

मातर्लक्ष्मि ! तुरङ्गवक्त्रदयिते ! तस्याङ्कभूमौ स्थिते !
प्रातस्त्वां शरणङ्गतोऽस्मि नितरां कृत्यैर्मदीयैस्समैः।
भीतस्संप्रति हा ! प्रसन्नमिह तं कुर्याः पतिं ते मयि
का वान्या शरणं ममाऽद्य करुणामूर्तिं श्रियं त्वां विना ॥ 1 ॥

नानापराधनिवहानहमस्मि कृत्वा
नाथ ! त्वदीय चरणौ शरणं प्रपन्नः।
श्रीवाजिवक्त्र ! वितथानि न ते प्रकुर्या
वेलाधनञ्जयरथावनिघोषणानि ॥ 2 ॥

योऽजायमान इति सर्वविधोऽपि जातः
त्वं वर्ण्यसे सकलचेतनरक्षणाय।
योषित्सुपत्तनमितोऽसि मदर्थमेव
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 3 ॥

सत्याचलादिषु भवत्प्रतिकूलवृत्ति
दैत्यद्वयं च भवतः पदमूल एव।
भातीति धैर्यमवलम्ब्य कृतापराधः
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 4 ॥

तादृङ्ङ्गिहीनमपि कञ्चन धीवरं त्वं
 सौमित्रतुल्यमकरोर्भगवन् स रामः।
भूत्वा पुरा तदवगत्य धृतिं दधानः
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 5 ॥

चापल्यभूमिमसुतोऽपि कपिं च कंश्चित्
 संमानयन्नभव इत्यथ राघवत्वम्।
धृत्वा पुरा तदवगत्य धृतिं दधानः
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 6 ॥

दत्वा श्रुतीश्च महिता अथ तस्य तासु
 नष्टासु रक्षितवति त्वयि दिङ्मुखोऽसौ।
वत्सापहारवृजिनोऽप्यभिरक्षितोऽभूत्
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 7 ॥

मातुश्च कुण्डलयुगं रिपुतोऽथ नीत्वा
 प्रत्तं त्वयाऽऽप्य भगवन् ! तव पुष्पमेकम्।
पत्न्या अदादपि न सोऽप्यथ रक्षितोऽभूत्
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 8 ॥

शुद्धान्तलक्ष्यमकरो रिपुशास्त्रमेकं
 आच्छिद्य पाण्डुतनयं च तदीयसूतः।
श्रुत्वा चरित्रमिदमस्मि धृतिं दधानः
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 9 ॥

मिथ्यां त्वदर्थमभिगीय बभूव दघ्नो
 भाण्डेन तेन सहितो भगवन् ! स मुक्तः।
आभीरवृद्ध इह कृष्णतनोर्विहारे
 तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 10 ॥

तर्कर्षिदारकृतपापततिस्समस्ता
त्वत्पादधूलिनिहतेति कथां निशम्य।
तत्पापजैत्रबहुपापकृतौ पटुस्सन्
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 11 ॥

सूर्यात्मजाय कपये कपिराज्यदाता
विस्रम्भणाय चपलस्य च ते परीक्षे।
स्वीकृत्य राघवतनुस्त्वमपालयस्तं
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 12 ॥

पादू प्रदाय भरतं ननु सान्त्वयंस्त्वं
तद्देशवासिजनतामखिलाञ्च मुक्ताम्।
कृत्वा बभूविथ मुदा परयाऽथ युक्तः
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 13 ॥

श्रीभाष्यकारविनुतो भगवन् ! तदानीं
मीनोत्तरोडुनि वरं ननु रङ्गधाम्नि।
तस्मा अदास्तु महितं तदवेत्य हृष्टः
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 14 ॥

मादृक्जनस्य सततं दृढपापबुद्धेः
वेदान्तदेशिकगुरुस्त्वगदं बभाषे।
न्यासं तवाङ्घ्रियुगयोरहमद्य देव !
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये ॥ 15 ॥

विद्यानिधिस्स भगवन् ! विधिसेव्यमानो
विद्याभिरेष न हि ते भजनेऽस्मि शक्तः।
विद्याङ्गकर्मकरणेप्यथ बुद्धियोगे
विद्यासुसङ्ख्यवचनैः शरणक्रियाऽतः ॥ 16 ॥

विना वाजिवक्त्रं न नाथो न नाथः सदा वाजिवक्त्रं स्मरामि स्मरामि।
हरे वाजिवक्त्र प्रसीद प्रसीद प्रियं वाजिवक्त्र प्रयच्छ प्रयच्छ॥ 17॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः समाप्ता॥